This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः॥ श्रीमन्नृसिंहाय श्रीरामाय श्रीसरस्वत्यै श्रीगुरुभ्यो नमो नमः॥ श्रीः॥ वंशस्ते मुरली तदस्तु
भणभोगोत्रं फणीन्द्राचलो माता हं जगतां त्रयस्य सविता वामेतरा दृक् मम॥ क्वास्ते ते शरणं त्वमेव सुमुखीत्येवं
हि पद्मावतीं वाचा संमदयन् जयत्यनुकलं श्रीश्रीनिवासो हरिः॥१॥ भवसिंधुपारगमने कविता मार्गप्रका
शनेपि मम॥ मानवमृगराजगुरोः सेवोडुपतरणिसरणिमावहतु॥२॥ कविता भुविता वदेव वंध्या भवि
ता यावदयं न वर्ण्यते हि॥ तरसा सुरसालवद्वदान्यः सरसालापवशंवदो मुकुंदः॥३॥ उग्रोप्यसत्कृ
तार्यः किर्तिविहीनोपि पंकयुक्तोयः॥ मंदोप्यशनिकठोरो दुर्जनसंघस्तनोतु मयि करुणां॥४॥ रसमय
जनतो॥ ल्लसितं मध्ये सभमत्र शब्दजालं मे॥ सद्गुणसंपद्दर्शकमथ भूयाद्वृत्तशास्त्रवत्सततं॥५॥ विज
यी भवतु॥ यस्तु स्वस्यैव चरणकमलोल्लासं दधानः॥ जंघावच्छूरधिगंभीरः॥ उदरबद्धलिविभंगशाली॥
नाभिवदात्मभूजननिदानपद्मोपगूढः॥ भुजवत्सद्वृत्तशोभितः॥ करवत्सच्चक्रनंदकः॥ वक्षस्थलव
त्कांतया श्रियोल्लसितः॥ ॥

Acc. No. 1633 M-1795
Title - श्री(निवास)विलास (अतिअपूर्ण)
Author - वेंकटेश
Date - ?
Subject - चम्पूकाव्य
folio - 17
Xerox - 33

KKSU LIBRARY
RAMTEK
441 106
M-1795
Dist Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंठवत्सन्मालालंकृतः॥ मुखवत्कलानिधिख्यातियुतः॥ अधरवरक्तरक्तः॥ दंतवन्मुक्तावलीहृदयंगमः॥
नयनवद्रक्तनीलः॥ ललाटवत्सतिलकः॥ कुंतलवच्छामाधिरुचिः॥ अवतंसवत्कलापमयः॥ श्रीश्रीनिवा
सोनामवसुधाधिपः॥ किंचयश्चरणश्लाघ्यंभुजंललितांसश्रियंवक्षस्थलींसर्वतोमुखजातशोभान्वितं
पादंचवहति॥ अपिचयःपादेरसास्पदंचक्षुः॥ नितंबेकल्याणगुणान्वितंनेत्रं॥ वक्षसिविपुलनयनोभि
योगंचधत्ते॥ अपिच॥ अथोदरशोभांकंठे॥ कंधरोच्छ्वसितत्वंकेशेषु॥ कुंतलंस्थितंपाणौ॥ सदाशयाभिराम स
त्वंसर्वांगेषु॥ चधारयति॥ यंचअंगदोच्छ्वसितंसंगरंचितशोभान्वितसूर्यसुतंरामंरामानुजंचाहुः॥ येनचशरेणेव
बहुविदारणक्षमेणसुकविकाव्यबंधेनेवापरुषाक्षरमैत्रीभाजा॥ महावराहेणेवमहीभुजाश्लेषरसज्ञेन
मुमुदेप्रजा॥ यस्मैचमाधवायललितेलतांगीकरणयोग्यायउत्कलिकाभिरामासज्जालकोच्छ्वसिताअ
नेककोषस्थितिरमणीयायोजनालतातातिरिवरुक्मिण्यादिमहिषीजनतानकेवलंस्पृहयाबभूव॥ किंतु
लत्पीनपयोधरचक्ररुचयेप्रद्युम्नोद्धवानुकूलायअक्रूरभानुमुखोच्छ्वसितायतिरस्कृतकुजन्मनेगजेमच्छंद
स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शितविक्रमक्रमाय तथाविधो गोपबालाजनश्च॥ यस्माच्च बहुलया दवसंततिर्दवसंततिर्बहुलया चाभूत्।
यस्य चाद्भुतकरश्रियं सदाशयो बहुमेने श्रवांसि श्रुतयो गायंति चेतोवृत्तिसुमनस्ततयोभिनंदंति॥ यस्य चामीक
रोज्वलाः भूषा गजाश्च॥ चापापकारिणी भ्रूलता मनोवृत्तिश्च॥ चामरश्री विराजिता कीर्तिः प्रजा च॥ चातुर्या
न्विता द्विजाः शत्रवश्च॥ चमत्कृतिज्ञाः मंत्रिणः कवयश्च॥ चारुतोल्लसिताः स्वस्त्रीक्रीडाः परस्त्रीक्रीडाश्च॥ चतु
रंगलीलान्विताः क्वचित्कालक्षेपाः रथाश्च॥ चराधिकोल्लसितं वार्तानिवेदनं चेतश्च॥ चाराधिकोल्लसितं मंडले
श्वरकदंबं चक्रं च॥ चापक्रीडायुधि यमुनायां च॥ चरणोत्पन्ना गंगा कीर्तिश्च॥ चपलासमाना स्त्रीकटाक्षततिः
शत्रुश्रेणी च॥ चिलाकर्षणतत्परः स्त्रीणां कामिनः वर्षासु कर्षकाश्च॥ चकोरकानंददायी मुखचंद्रः कुचश्च
वनितानां॥ चपटिका शत्रुमुखे चर्या चर्या च गुणानां॥ चेतः प्रसादरम्यः सर्वोपि जनः कटाक्षश्च॥ यस्य च
स्मरविद्वेषी सुंदरभावः प्रतापश्च॥ स्मरणश्लाघ्याः द्विजा वीराश्च॥ स्मरति मनोज्ञा वनिताजनता वियोगभ
र्तारं सौंदर्येण च॥ स्मरोचिताकाराः पुरुषाः स्त्रियश्च॥ स्मार्ताः आचाराः शत्रवश्च॥ किंच स्मरचिंतव्यथः वि

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युक्तस्त्रीजनः॥ स्मयशोभाधरः भटवर्गः नशत्रुवर्गः॥ यस्य चराष्ट्रहरणोद्योगभ्रष्टाश्चोरावीराश्च॥ हरा
वंगहृद्याचंदनलिप्तकुचयुगी अधरपुटी च स्त्रीणां॥ हरावगुंठितकंठाः सुहृदः शत्रवश्च॥ हेलासक्ताः का
मिनः कर्षकाश्च॥ यस्य चतुरंगस्थानेऽश्वावेश्याश्च नटंति॥ त्वरान्वितमश्वचक्रं चक्रं च॥ त्वचारुचि
तशोभं मृगकदंबं शत्रुवृंदं च॥ त्वंगदभंगशोभान्वितः मित्रभुजः शत्रुभुजश्च॥ यस्य चराविहितशोभमप्यर
विहितशोभं चक्रं॥ गानंतानि सदोवितानि मंडलान्यवितानि॥ हारविहारी अविहारी च स्तनमंडलं स्त्रीणां॥
यस्मिन्शासति वसुमतीं गिरिविभ्रमाः गजा इव द्विजाः समदाः द्विजा इव गजाश्च॥ सुप्रतीकस्पृहु
णीयाः करिण्य इव तरुण्यः सार्वभौमयोग्याः तरुण्य इव करिण्यश्च॥ कलमहिता वाणी वकेदारश्रेणी
बहुधान्यसुहृद्या केदारश्रेणी ववाणी॥ अधिकोन्नितसंगाः स्त्रियः पुरुषाश्च॥ अधिकवचस्थिति
रम्याः भटाः शुकाश्च॥ अधिकवलिताः शत्रवः स्त्रीकटाक्षाश्च॥ अधिकंपरहिताः रणे भटाः सभासु वाचः
सिंधुष्विवाधिकपोतप्रचारः गृहप्रांगणेषु वलभीविटंकेषु च॥ महारण्येष्विव अधिककोकागमविलसत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं कामिषु प्रमदवनेषु च॥ शत्रुरिव अधिकमलयशोभाधरः॥ वंसंते वायुर्युवसु॥ स्त्रीकटाक्षाश्च॥ ग्रीष्मेष्विव अधि
का कोलदर्पहृतिः॥ विषवैद्येषु मृगयासु च॥ स्त्रीजनतेवाधिकं पाकामितश्रीः अहितत्ततिः कविता च॥ पिका इवाधि
कलालापाः बालकाः विद्वांसश्च॥ किंचाधिकपटोल्लसिताः अधिकचोरीकृतशोभाः अधिकोपचारविदग्धाः स्त्रि
योनपुरुषाः॥ अद्भुतमेतत्॥ यदेते राजसचिवाः बहुलरचितशोभां वहंति॥ तथाहि॥ लक्षोपकारमंत्रविदः रक्षोपका
ण रमंत्रविदः॥ लक्षप्रकारज्ञाः रक्षणप्रकारज्ञाश्च॥ लतांगीकृतप्रणयाः रतांगीकृतप्रणयाश्च॥ किंच बहुललामा
न्विताः बहुलरामान्विताश्च॥ बहुलमण्यालिंगितवक्षसः बहुरमण्यालिंगितवक्षसश्च॥ बहुलाज्योपभोगक्ष
माः बहुराज्योपभोगक्षमाश्च॥ बहुलचितशुभाचाराः बहुरचितशुभाचाराश्च॥ बहुलसाहसोचिताः ब
हुरसाहसोचिताश्च॥ किंच॥ सगदः कुमुद एव॥ पुण्यजनविद्वेषिणी कौमुदक्येव॥ नाभिजातः सनदेव॥ अप्रमदः स
नत्कुमार एव॥ उग्रप्रियाः पशव एव॥ विषमदृष्टिः पशुपतिरेव॥ अपि च मधुस्थितिः सरसिजेषु॥ मागधोल्लासः
स्तुतिपाठसमये॥ रसभंगयुक्तत्वं तरंगिणीषु॥ कुप्रीतिः महावराहस्य॥ कुमारिख्या कन्यानां॥ कुमुदाकरत्वं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरसां ॥ विषमहितता सर्पाणां ॥ दुष्कीर्तिः कुव्यासु ॥ दुर्बीजदर्शनं मंत्रशास्त्रे ॥ कुशासनग्राहित्वं तापसानां ॥ स
वितृविद्वेषः सैंहिकेयस्य ॥ मातृविरोधः शुंभस्य ॥ किंच कुवेण्याख्या मत्स्याधान्याः नवतिलानां ॥ विकचासं
गः ग्रहाणां नयूनां ॥ पराभवः संवत्सरेषु ॥ नसैन्यस्य ॥ विनायकत्वं गरुडे भवत्कृतथागतेषु घेव मुहुर्ललास
॥ सभासु सेनासु नितंबिनीषु माणिक्यमालासु नवैं बभूव ॥ १ ॥ सुमनस्सु पतितद्विजः पूषा उग्रकराभियो
गभाक् कमलवर्गश्च ॥ सच्चक्रशब्दवाच्येषु अरसंगतशोभमायुधं सूर्ययोगहृष्टं कोकमाहः ॥ कलोलुसि
तेषु कलंकी चंद्रः पक्षपातीपिकश्च ॥ किंच ॥ श्रीमत्सरस्थितिः क्रीडोद्यानेषु कंठेषु च नलीकेषु च ॥ अल
कारोचितत्वं सीतायाः पद्यानां च गजानानां ॥ सततमहीशमदः जलदकालः सर्पराजे च नराजसु ॥ किंच अ
पदानि शत्रुवृंदानि पद्यकदंबं च ॥ सत्पद्यानि कविनिकुरंबाणि शत्रुजालं च ॥ अनुगतं मृडानि योगिच
क्राणि स्त्रीजातं च ॥ पवित्राणि द्विजकुलानि शस्त्रं च ॥ नालानि नालावृंदानि गजयूथं च ॥ भानि नक्ष
त्राणि जनकदंबं च ॥ सत्संगरहितभावं विषमहितत्वं च पल्लवरुचिं च ॥ सैन्ये सरसि रमण्यो जानंत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं बहुना॥ विधुः संपदि चापत्तौ सोमस्तारापतिर्गिरि॥ तस्मादस्मिन्महीपाले राजत्वं राजते सदा॥२॥ किंच धनुर्विद्या
वतां श्रेयान् ज्योतिषां यो शुमानिव॥ यशसा यस्य भाति स्म द्वितारानाथवज्जगत्॥३॥ यस्य प्रकृतयो वश्याः इंद्रि
याणीव चेतसः॥ नयेन तस्य विद्येव शुशुभे तनमेदिनी॥४॥ पुरी यस्य जनैः पूर्णा जना गुणगणैरिव॥ हया यस्य जवैर्यु
क्ता सपक्षा इव मारुतः॥५॥ भूमेरकृष्टपच्यत्वाद्विषां निःशेषितत्वतः॥ यस्मिन्राजनि जानीमो ज्याकृष्टिर्नैव विद्य
ते॥६॥ प्रजाभृत्यर्थमेवास्य धृतिश्चापकलत्रयोः॥ संख्यो हुसं[illegible]तो जानंति तद्विग्रहसुलक्षणं॥७॥ वेणीस्रोतो
निशा रात्री रतिः कामनितंबिनी॥ रोहितं यदिषु स्त्रीणां मृजुशक्रशरासनं॥८॥ किंच॥ यश्च सत्तिलकतया चित्रकामि
तसौंदर्यः॥ सद्वलयभूषिततया विपुलकटकरचितपुन्नागशोभान्वितः॥ गौरांबरतया शुभ्रानंतश्रीविराजितः॥ किं
च॥ माधवतया वैशाखेडितः॥ अंबिकानंदनतया वैचित्रवीर्यः॥ निर्जरतया वैमानिकामितरूपः॥ सन्मालालं
कृततया वैजयंत्युद्भूतिरुचिरः॥ सुमुखोपि वैमुख्यस्थितियुक्तः॥ सर्वसुहृदपि वैरोचितः॥ मैत्र्याधिकासक्तोपि
वैराधिकासक्तः॥ वैकुंठोपि शुगसंप्रदायज्ञः॥ व अपि च यस्य च पुरी अयोध्येव द्वारका यत्र हि रामानुरक्ताः उद्व

स्य

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व प्रणयिनः अक्रूरकर्मानुकूलाः सुमंत्रोच्छ्वसिताः सुयज्ञाभिरामाः लसद्दशरथाः सुमित्रोपेताः निवासिजनाः ॥ य
त्र च स्तननरुचिरो मेघ एव यस्त्रीजनः ॥ मदनरुचिरो वासुदेव एव नगजसंघः ॥ कदनभटवर्ग एव नकुंतलकला
किंच ॥ षः ॥ भवनभूषणानि केतनकदलानीव कलत्राणि ॥ क्वणनमंजुलापि न क्वणनमंजुला वीणा ॥ कथं न सा स्वर्गादतिरि
सदा च्यते ॥ यत्तः ॥ यत्र स्वर्गेपि विघटितत्वं ॥ महाकुलगिरिपक्षच्छेदके प्रभुता ॥ कुमुदहितकारिण्याः करिण्याः अनुपमा
भिधानरमणीयता ॥ वसंतं माधवं वत्सु मनसं प्राहुः ॥ सदा मलकविस्पष्टस्पर्धिनं गुरुमाहुः ॥ सदा शक्रयशोभां
वहति देवगणः ॥ कृशानुभावमंगीचकाराग्निः ॥ वैवस्वतं यमदेवमाहुः ॥ वरुणस्तु विप्रचेताः ॥ अलीकदृष्टिः शि
वः ॥ कुबेरस्तु गुह्यकामितप्रणयः ॥ किं बहुना ॥ स्वः पुरंदरं वहति इति लोकवादः ॥ अलमतिविस्तरेण ॥ किंच ॥ सु
रवरदः सुरवरदः सकलः सकलो बली बली सततं ॥ ललितप्रमदो ललितप्रमदः सरसश्च सरसश्च ॥ १ ॥ पादैर्हि य
मालती कुवलयं यस्यादरे जरोते वक्षोलं करणं तनोति कमलावासोपि कोशायते ॥ लये ॥ कुंदश्रीः कुमुदोच्छ्वस
च्च भवनद्वारोपशल्यं सदा जीयात्सत्सुमनोभिरामचरितः श्रीकृष्णकल्पद्रुमः ॥ २ ॥ यस्य च पंचधाराभयंकरम
ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि सहस्रधारातिभयंकरमश्ववृंदं। अस्त्वेतत्। सहि कदाचित्। निरंतरसुखानुभवत्कुंठेतरमहिम्नि वैकुंठे वनिता
सुनचरमया रमया सह रममाणः धरणितलं दिदृक्षया तत्र तत्र पर्यटन्नोकाकी कस्मिंश्चित्प्रदेशे॥ खड्गचक्रश
रासनशिलीमुखोद्भासितं मत्तसारंगहरिचक्रिशोभितं अनेकभूदारकुलसेव्यमानपादं महाराजमिवाशेषभूभृद्वृत्तं सं
कंचनपर्वतं ददर्श॥ स एव हि वरचक्षुश्च वनिर्जरकन्यकाविहारभूमेः॥ विश्वाधिकां कांचनश्रियं वहतः॥ ध
राधरख्यातिगतस्य॥ गौरद्युतेः॥ अंगराजस्यापत्यं नागराजस्यांशावतारः शेषाचलो नाम॥॥ यश्च गिरीशोपि
चंद्रस्वरूपः॥ तुंगभद्राकृतिरपि शतद्रुशोभितः॥ अथ चैनमालोकयतस्तस्य चेतसि चिंता समजनि॥ किमयं वि
सहि ध्यो भवेत्। नहि नहि करीरजाततिरस्कृतमहिमाऽयं पुनः स्वपादैकदेशाश्रयवर्द्धितकरीरजातः॥ नापि मेरुः॥ स च
सुराक्रीडं। नापि महेंद्राद्रिः॥ सह्येकरोमाश्रयः॥ अथवा सोयमेव भवेत्। शेषमारुतविवादेन भूतलं प्रपन्नः दि
व्यभोगप्रणयिनः॥ कलधौतरूपस्य॥ रत्नसानोरपत्यं सर्पराजस्यांशावतारः भगवान्भुजगाद्रिः॥ भ
वतु यो वा को वा अवगाह्येनावमश्यामीति॥ ततश्च तथा कृत्वा सानुगोप्येकाकी सुपादोरुनितंबमध्य



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देशो ह्युसन्नाभिशोभां॥ सुललितकर्णनेत्रां शिखंडमनोज्ञदंतावलीविराजितां॥ कुंतलसत्केतकीसुमां॥ पुन्नागस्पृहणी
यां॥ पर्वतैकदेशस्थलीं तत्र वनदेवतां चापश्यत्॥ अथ तया वनदेवतया देवायमद्भुतनिदानं पर्वतेंद्रः यतोस्य मनोज
वसत्वं॥ तथाहि॥ अत्रेदं नंदवचनं॥ यत्र समंदारानंदमनुभवति जनः प्राप्नोति च संतानसुखं॥ महाकल्पलतांगीक
रणबद्धस्पृहश्च॥ लसद्विपारिजातं च हरिचंदनं च पश्य॥ किंच सदा खंडलसद्विचारश्च लत्पति सदा मराली संचा
रश्च राजते ललिताप्सरसां गणश्च शोभते॥ अपि चायं क्वचिद्धातुरागरंजितांबरमस्करीदर्भासनभूषितः
परिगतमुनिगणः॥ निकटशोभमानकरीरः निरुद्धाशावकाशः अनुकरोति सन्यासिनः॥ क्वचित्सनारदः
पर्वतत्वं सफलयति॥ क्वचित्कौशिकमदनार्कसोमशिखिवरुणावासतया स्वर्ग इवोपलक्ष्यते॥ किंचिद्वि
हस्य देवतः पश्य॥ अत्र हरिपतिर्गजं विदारयति॥ शरभः केसरिणं बाधते॥ ऋक्षस्त्रासितलक्ष्मणः सामो
नलं भक्षयति नीलो गवयश्चोन्मूलितरंभः पनसमपि भंक्तुमिच्छति॥ अनंतशाखोल्लसितागमश्रीर्न्यंकुव्र
जाराधितपाददेशः॥ नानाद्विजालापमनोहरो यमाचार्यलीलां विवृणोति शैलः॥२॥ इंद्राणी रुचिरतरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शीलः

सरोभिरामो ज्ञातैरावतवरकुंभरम्यलक्ष्मीः॥ सोयं निर्जरवनिताविहारशैलेशं प्रथयति पाकशासनत्वं॥ किंच॥ सुहितमि
लिंदाबहलमरंदापरिमलपुंजाः कलितकरंजा॥ इह नृपमल्लीव्रततिमतल्लीनिबिडितपत्राकुसुमविचित्रा॥ ३॥ साश्चर्यमित
उत्तरतो देहि दृष्टिं॥ मधुरावन्यां कृष्णेनेववन्यां कृष्णवर्त्मना क्रीडितं भवेत्॥ यतोयं पर्वतैकदेशः हीनबकः नष्टहंसः मृदितशृं-
गालः उत्सन्नबाणो दग्धभूमिजः त्रासितगजमल्लः॥ दलन्मल्लिकाजालनिर्यन्मरंदद्रवासारमत्तालिगीतं॥ समाकर्णयद्भिः त्वनिर्य
कुरंगद्विपारिं विलोक्यापि नो भूभुजंगप्रयातं॥ १॥ इतः पुरस्ताद्भारतसमर इव धनंजयोल्लासो दृश्यते॥ तथा हि॥ विपक्षीभू
यशकुनिर्नश्यति द्रोणोपि मृदितपक्षः भीष्मोयं मुलूकोपि ग्रस्तः अत्रा अपलायितशल्येन कर्णोपि दग्धः एका
किनाधार्तराष्ट्रेणोत्पतितं अत्रात्र शरासनानां भंगः शिलीमुखाश्चुप्तलक्षाः संचरंति सर्व एते भूभृतं खेदयंति क्री
क्रीडत्कीरां नीलतमालां वनलक्ष्मीं शक्राश्माढ्ये सानुनिजातां गजवृंदैः॥ दृष्ट्वा कांतां विसृतपक्षो घनबुध्या नृत्य
ति पक्षी मत्तमयूराभिधे एषः॥ १॥ फालवत्तिलको ल्लासारंभारम्यश्च रूपवत्॥ नेत्रवत्क[illegible]लानंदी कांतानां पन्न
गाचलः॥ २॥ क्वचिच्च तालाधिकसुंदरश्रीः क्वचिच्च कुंभोन्नतचारुलक्ष्मीः॥ क्वचिच्च पीनोच्चकरीरसंपच्छेषाचलो ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं कुच[illegible] मृगाक्ष्याः ॥३॥ इति सादरमुपदिश्यमानानि वस्तून्यवेक्षमाणः क्वचित्प्रदेशे अगस्त्यद्विलीनमिव सागरं ॥ सिं
धुनि[illegible]णमभ्यस्यतो विश्वस्रष्टुरुच्चावलीव हरिणा कल्पितं ॥ अभिनवसमुदितमणिसमय इव विधेः पुराणानेकपा
रावार[illegible]क्षेपस्थानं विश्वकर्मविनिर्मितसुजनहृदयनिर्मलानेकस्पष्टिकसोपानावली प्रतिबिंबितसुरभिलमरं
दधारा[illegible]कलितललितबिसकुसुमसौरभ्यलुभ्यन्मधुरमधुकरनिकरमंजुगुंजितसमाकर्णनविवशांतरंगकुरंग
शाव[illegible]मारणे छानिपतद्विफलीभवदुड्डीनसहस्रमंदाक्षमुद्रितमर्त्तशार्दूलं ॥ जलार्द्रविशदवसनांतरितप्रस्फुरदोप
लक्ष्यमाणपीनोच्चकुचकलशसंजातमत्तमातंगकुंभयुगलभ्रमजनितविदारणस्पृहागतकंठीरवकिशोरकभयार्द्रम
ज्जद्वनदेवतानिकरदेवार्चनकुसुमापचयार्थसक्तबाल्यावधिबद्धब्रह्मचर्यव्रतदूरीकृतमदनतंत्राभ्यासमुनिकुमा
रकनखांकुरक्षतजनितसीत्कारानुमीयमानजलविहारपरवशजलमानुषीजनवदनपद्मभेदं ॥ तटनिकटावटस्थली
निलीनजृंभमाणपुंभावलीलाविवशविद्याधरवररमणीमणिमसृणमणितश्रवणजनितकपोतकंठारावभ्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्राम्यछौगेयशतसंकुलं॥वराहयूनितादलगाढांकपालीदोहदप्रफुल्लबालकुरवकवनीपरिगततटैकदेशंकामिनमि
[illegible]वोत्कलिकासहस्रं॥अर्जुनमिवसिंधुराजपरिपंथिनं॥ललनाहस्तमिवविलसदूर्मिकाचक्रं॥उच्चैश्रवसमिव
शुभावर्तहृद्यं॥साकेतदेशमिवोर्मिलास्यदर्शनमुदितलक्ष्मणं॥राजाभिषेककालमिवपुंडरीकच्छायानिषण्ण
कलहंसं॥कालियनागमिवकृष्णवेणीसमं॥कलशपारावारमिवजलैकदेशसुखसुप्तचक्रिणं॥जनित
पद्मं च॥दृष्टमातंगकुलविहारमपिशुद्धं॥सपंकजातमपिनि[illegible]जालं॥जडाशयमपिनवरसोल्लसितं॥
स्वामिपुष्करिणीतिविख्यातं॥कमपिकासारमपश्यत्॥अथतदवलोकनाद्विगतपरिभ्रमणायासःक्षणंवि
श्रम्यहंसइवकेवलंक्षीरमयमाहारंसुपकल्पमाढ्यइवसद्दातागममभिनंदन्॥तत्तीरएवनक्षत्रगणस्येव
संबद्धमूलस्य॥शिवचंद्रस्येवसदाबालस्य॥भागवतस्येवविलसदनेकस्कंधस्य॥सुजनस्येवसफलजन्मनः॥ग
रुडस्येवसुपर्णस्य॥चिंचातरोरधप्रदेशेपातालगतागतमार्गमिवसुंधरानाभिमिवकिमपिवल्मीकमलोकयत्अ

पंक ५

७

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।चिंतयच्च॥ इदमस्माकमावासस्थलीभवेत्॥ यतोनिकट एवेयं पुष्करिणी घनरसमयीवानितेवसुखयतिस
फलितस्वापाच॥ अयं वृक्षोपि कुटुंबीवसार्थकितसुतस्तेयति॥ द्विजाश्रयश्च॥ इयं कल्याणी गगनगं
गानिवसत्यविदूरे सखीवानुकूलितकमला॥ चराभियोयमहद्याच॥ एतेपक्षिणोपि ऋषिगणा इवपुराणा
गमप्रणयिनः खेदमपनयंति॥ सकलकलाश्च॥ एषभगवान्क्रोडरूपी हरिस्त्रैवनिवसति॥ नूनमयं कलित
धाराधररुचिरेनांमहीक्षणमपिनविमुंचति॥ इत्येवमालोच्यवासमकरोत्॥ ततश्चगतेषु केषुचिद्दिवसेषु॥
कदाचिद्वनलूरुचिवरान्निर्गत्य क्वचिद्वनोद्देशेयास्यन्॥ क्रोडजातितयानारायणावतारतयाच॥ भूदारंजंगममिवरौद्र
रसजनकमिवशेषाचलस्य॥ धीरछुष्यद्वरदुकसपत्नेनकंठारावेण हसंतमिवपुष्करावर्तंस्मरंतमिवाद्यापिहिर
ण्याक्षयुद्धसंरंभस्यभगवंतंकुहनावराहमद्राक्षीत्॥ तदनुअनिमिषलोचनलोभनीयश्रीः॥ लसत्क्रोडाकृतिः
गौरंपयोधरराजमानकांतिः॥ अचलानंदहेतुः॥ अयंजगत्स्रष्टुर्नासाचिवराल्लुब्धजन्मास्तब्धरोमाइयंदेवी

रजताद्रि
मूर्तिमंत
मिव ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ भवतु दिष्ट्या दृष्टिमार्गमगमदेतस्मिन्मिथुनं तदेतत्प्रणामविषयी करोमि॥ इयं सरलतामद्गुणानां सेयमम्लानता पु
ष्पाणां अविकृतिः क्षीरस्य॥ मणेरकाठिण्यं निधुवनस्यानवसानं लक्ष्म्याः अचांचल्यं विदुषाममात्सर्यं तपसो [illegible]
निष्कामतो मैत्र्यानिर्व्याजितास्त्रीणां योग्यसमागमः सुकवेः श्लेषकाव्यरचना वैदग्ध्यं सकलजनश्लाघनीया
भवतीति निश्चित्य यावत्तथा कर्तुमिच्छति तावद्दूराहदेवोपि दूरान्निरीक्ष्य हंहो पुरत एव श्रीनिवास इव लक्ष्यते॥
अयेऽधररसविनिर्जितनवसुधे वसुधे त्वमपि विचारय॥ तव कुचो भोगेनेव चक्रहृद्येन करेण चंद्रो चलसो
दर्यं सरेणेव मुखेन॥ सरलतामनोज्ञेन चरितेन मदाश्लिष्टेन लोचनयुगुलेन॥ सर्वभूभृद्दर्पहारकेण प्रतापेन
राजमानो राजमानहारिवदने वदने तावायं श्रियो न वेति सभुजाचालनं कुचधिकृतगोत्रया गोत्रया सह सछ
पन्फुल्लपंकजेनयनः द्रुतमागत्य पादयोर्नमतस्वे न समंतः वत्स किमेतत् क्व भवान् क्वायं पन्नगा
द्रिः क्वागमनक्रमः क्व तव दर्शनं अयं परिपाकः प्राचीनपुण्यस्य इदं फलं तपस्तरोः इयं सूचना
भाविकल्याणप्राप्तेः सर्वथा नमोस्तु ते भगवते अतर्कितघटनापटवे भागधेयायेति व्यवहरन् हरन्नि



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वमानसंध्यां नसंगतइव किंचित्स्थित्वा वीरलक्ष्मीनखक्षतायितहिरण्याक्षगदाघातकिणांकेनवसुमतीक
ठिणतरकुचयुगलसंघर्षमसृणितेभुजांतरेक्षणं कृत्वा वत्सदिष्ट्या तादृशमहावीरकदंबकालरात्रिकल्पात्
भारतसमराद्वत्सायाः इंदिरादेव्याः सौभाग्यादेवो वरितं॥ जानामि॥ भवतु तावत्कथयैतत्कच्चित्कुशली
यादवेषु कौरवेषु च सुराजन्यमार्गप्रवृत्तेषु अंधकुलशिखामणिरुग्रसेनः धृतराष्ट्रश्च॥ दिवकीनाशस्पृ
हास्थानं कंसो युधिष्ठिरश्च॥ सुबलांगजप्रणयी अनिरुद्धः कर्णश्च॥ तोषितसांबः प्रद्युम्नः गांडीवधन्वा च
उच्छ्वसदनिरुद्धकामः बलभद्रः दुर्योधनश्च॥ स्वगुणश्रवणतोषितकर्णः उद्धवः शकुनिश्च॥ सदानपगतस
ह्रीतिः कृतवर्मा भीमसेनश्च॥ अद्य मे भूद्वराहश्रीः श्रीनिवासत्वदीक्षणात्॥ बहुना किं त्वदाश्लेषेर्ध
न्या क्रोडस्थितिश्च मे॥ १॥ इति बच्छालापः॥ क्व भवानित्यादि पूर्वोक्तमेव स्तब्धतारं चलितमौलिना सा
ग्रस्थापितांगुलीकं आम्रेयन् तेनापि क्वचिन्मौनमुद्रया क्वचिदंतर्व्यथापि शुनशुष्कहासेन क्वचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मौनमुद्रया क्वचिदंतर्व्यथापि शुनशुकहासेन क्वचित्कंठे रवेणापि नरकवधवर्जं स्ववृत्तस्य ख्यापयित्रा लक्ष्मीनेत्रा स
हकस्मिंश्चित्प्रदेशे क्षणमासांचक्रे॥ अथ श्रीनिवासोपि प्रेमार्द्रतया विनयबहुलया तद्वाचा अभिनंदितः भगवन्माया
दंष्ट्रिन्॥ सरसाविशदाक्रोडीकृतसारगुणा तनुश्च वाणी च॥ नानार्थाय प्रभवति कस्य न दृष्टा श्रुता वा ते॥१॥ किंच देवा
त्र कंचित्कालं वस्तुमिच्छामि॥ तद्भवतो भूमिं कामये इत्यकथयत्॥ तच्छ्रुत्वा किमयं प्रभोः वराहदेवस्य महिषीं विश्वं
भरादेवीं स्वीकर्तुमिच्छतीति॥ किंचित्कोपशोणिते क्षणे पात्रिकदंबे विलज्जमानायां धरादेव्यां वराहदेवेपि दर्शं दर्शं
देवीवदनदरदर्शितमंदहासे श्रीनिवासमन्मनीषितमप्येतन्न केवलमेकां धात्रीं किंत्विमां बकुलमालाभिधानां
धात्रीं च स्वीकुरु कुरुकुलप्रणयिन् आदौ भक्तैर्मद्दर्शनादिविधिः कार्यः वत्सैतदपि जानामि नावयोरंतरमि
ति॥ तथापि कालः कलिरागतः त्वमपि स्तोके जले न मज्जसि तदपि ज्ञातपूर्वमेव यत्मात्स्येवामने चाप्यवतारे स्वल्प
स्थानं प्राप्याक्रांतवानसि॥ सकलमपि भुवनतलं॥ नोद्वाद्यमर्मपरेषां॥ अथवा किं नः कार्यं जरठानां तथापि मर्यादा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कापि चरमिति वदति यदा ज्ञापयंत्यार्यचरणा इति दर्शितविनये वासुदेवे अतिक्रामति घटिकाद्वये वियन्मध्यमारूढे त
मः कलाचित्रभानौ चित्रभानौ ॥ जाताकस्मिकमेघरावमतिभिः संभावितः केकिभिः निघातभ्रमगाढलग्नवमिते
रानंदितः किन्नरैः ॥ श्रीमत्पन्नगशैलराजवसतेः क्रोडस्य लक्ष्मीपतेर्नादब्रह्ममयोल्लासनितरां मध्यान्हभेरीरवः ॥
त[illegible] यथास्थानं सबकुलं मालांधरां स्वीकृत्य प्रापतुः ॥ अथ विश्वंभरया पृष्ठे तद्वृत्तांतो वराहः कथयामास ॥ शृणु
देवि सरसे रसे सावधानं स्पर्शनानंदभाक् ॥ अचलराडसंपद्धरः ॥ भूभृत्करप्रसादमहितः ॥ अखंडचक्रश्रियं दधानः
तव कुचाभोगाभोग इव न्यवसच्चोलमंडलं चोलो नाम महीपतिः ॥ यस्मिन्विलसति चोलनलोभनीयरम्याकृतौ ॥ स
न्मालापरिगते ॥ सुवृत्ते ॥ अत्युन्न[illegible]धर्मशालिनि तव कुचमंडल इव राजनि ॥ अहमिवानिमिषश्रियं दधानः ॥
सात्त्विकभावमापन्नः ॥ सकामः सकलोपि लोकः ॥ एवं स्थिते ॥ कदाचित् ॥ कापिलसच्छृंगारोचिताकारा ॥ सुरभि
सुमनोहारिणी ॥ गोपालबालिकास्वसमानां कामपि गोमानीय विक्रेतवती ॥ सा राजातां रोहिणीं सत्यपि महिवर्गे पु
त्रार्थमचीक्लृपत् ॥ सा च गौश्चिरंतनेन गोपेन पाल्यमानाप्युत्पन्नतं भूभृच्चक्रवर्तिकुमारं रोषाचलमाश्रित्य पां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फुटे वा क्षीराभवनमायाति स्म ॥ अन्यदा तु राजदंडभीत्या वल्मीकेक्षरक्षीरामाराद्विलोक्य नां धेनुं परशुना जा
मदग्न्य इव क्षत्रियनतिमखंडयत्स गोपालः ॥ सापि कुहना धेनुर्योगिराजिरिव कालजवेतं कुठारप्रहारं याव
द्विफलयति ॥ तावदेव कल्याणि किं कथयामि ॥ वत्स वासुदेवस्यौदुंबरक्षीरार्ककार्पासगवेषणदशा संवृ
त्ता ॥ तदप्याकर्णयेः ॥ यत्परस्ताद्वृत्तमिति ॥ ततश्च तवगेयमिव तालप्रमाणो ज्वलरक्तपश्यतो गोपस्य सा
वस्था जाता ॥ यामुचुकुंदस्वापभंगकारिणो यवनस्य अथवा सरसाहित्यनिदकस्य दुष्कवः अथ ज्ञातवृ
त्तांतश्चोल आणत्या लोचयामास ॥ अहो कोयमद्भुतदर्शनः सुप्रतीकोपि सार्वभौमा इव दृश्यते ॥ कल्पोपि
पुन्नाग इव राजते ॥ सुग्रीवोपि बलाहकस्यानुकरोति ॥ नीलोपि नलसुंदरः ॥ तिष्ठत्वेतत्कोयमपि जानामि ॥ किमयं प्रता
पनिधिः ॥ सप्तार्चिः न ह्ययमकृशानुभावं धत्ते ॥ स्निग्धछायो सप्ताश्वो भवेत् ॥ अहहनि शोच्छ सदंबरपरिष्कृतोयं ॥ भवतु यो वा
को वा कथमीदृशस्यैतादृशावस्था किमिति संभावयामि ॥ यदि तमेव पृच्छामि ॥ नायं प्रज्ञावतां पंथाः ॥ अनालोकितकेन यथा
गतं गच्छामि ॥ तदितरा कानिस्त्रं शता अथवा मदीयगोक्षीरन्यायेन पिबतस्तवोचितमेव ॥ जातमिति भणामि ॥ तद्वीथीपि

म

१०

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाचस्य गृहानयनप्रकारः इति विविधप्रकारमालोच्य कथं कथमपि मधुराधिपोयमिति ज्ञात्वा निश्चित्य प्राप्तकालप्र
तिक्रियेयमिति यावत् दंडप्रणंतुमिच्छति ॥ तावदेवतं दृष्ट्वा देवोपि प्रकोपप्रस्फुरदधरविनिर्गच्छद्रूक्षाक्षराणि श्रावयां
चकार रिरे चोळेंद्र साधु रे साध्वनुष्ठितं भवता ॥ नायं तवापराधः पापीयान् मदत्स्त्वामुत्तरयति प्रायस्त्वद्विधाः बहवो श्री
ना महतामवज्ञां स्त्वानुरूपं फलमापुः ॥ तथाहि ॥ निमिमदनयोर्विदेहभावः ॥ चित्रकेतोर्नहुषस्य चाहित्वं ॥ जयनलकू
बरादेः पलाशित्वं ॥ त्रिशंकोरिंद्रद्युम्नस्य च मातंगता ॥ अतस्त्वमप्येवं भवेति ॥ तच्छ्रुत्वा स भूपतिर्वज्रेण ताडितो स्त्रे
निःसंज्ञो निपपात ॥ देवि च लग्नं तुच्छीकृतानंतेनंते ॥ चित्रमेतत् ॥ कुठाराहतिरेकस्य गोपस्यान्यस्य पंचता ॥ पश्य पश्य
वरारोहे तदन्यस्य पिशाचता ॥ १ ॥ चक्रिणा श्रीधरेणायं वल्मीकस्थानवासिना ॥ तेन चोळो नरेंद्रोपि क्षणादुद्वेजितः
प्रिये ॥ २ ॥ अथ तस्मिन्मोहमापन्ने भर्ता जीवनदानेनापि सत्कार्य इति जलसेकादिना कृततत्प्रबोधप्रयत्ने कस्मिं
श्चिन्मंत्रिणि देवप्रकृत्या कयाधुतनयो यन्नृसिंहेन त्वया दंड्य इति चित्रसमुद्रोदरमज्जनं चेतसः दाहशक्तिश्चं
द्रिकायामपि दृष्टा भवेत्कठिनमपि हय्यंगवीनमिति सचेलां चलत्प्रसारं प्रणणमंति श्रीनिवासेपि किंचिन्मंदी

विषं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेत्कोपविशेसं कक्षास्फालनं नृत्यति ॥ गगनतलावलंबिनि कलहदर्शननिर्भिद्रे मुनींद्रे ॥ अयमस्याभिनवपि
शाचस्य चोलदेवस्य वासार्थं क्लृप्तमिति प्राक्स्थिताक्रंदोद्धतकुटुंबकं जीर्णशाल्मलितरोर्निर्वासयति वेतालभृत्य
गणे ॥ राजा चोलोपि कथमप्युद्बुद्धः सांजलिबंधं वाचमुवाच ॥ अंबाविमुखो भीष्मश्चिरंजीव्यप्रमदर्कः प्रजार
हितः पात्रं नासीत्किं ते करुणायाः किं तथाविधानाहं ॥ अथवा किं प्रार्थनया ॥ महतां शापेन जगत्यस्मिन्को वा
नष्टः ॥ इंद्रद्युम्नस्य पन्नागत्वं नलकूवरस्य अर्जुनत्वं ॥ नहुषस्य चक्रित्वमिव ममापि देवस्य शापः कामप्युन्न
तिं नयेदिति ॥ ततश्च श्रीनिवासोपि श्लेषकाव्यबंधइव क्षणं कठिणस्वभावः द्राक्षामधुरांधिपो वाचमु
च्चारयांचकार ॥ भो भो महाराज चोलेंद्र ॥ रोषाधीनचेतसा वृथा शप्तोसि धिक्धिक् क्रोधाधीनं नरं ॥ पश्य पश्य
कश्चन क्रोधनः सहि पुरस्कृतक्षय एव भवति ॥ अस्त्वेतत्कंचित्कालं सफलितमद्वचनो भव ॥ अचिरादेव तस्मान्मो
क्षो मोक्षश्च भविष्यतीति ततः पश्य द्वृतं तद्भवती जानात्येव ॥ इत्यभिधाय स्वोचितकार्यायुतदत्तहस्तावलंबः अत्रि
रिवोदतिष्ठत् ॥ इतश्च श्रीनिवासोपि वनादागत्य सहबकुलमालया ॥ अहो निष्कारणमैत्रीनिर्व्याजा प्रीतिः लोको

मधु
चतरं





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरं सौजन्यं निरपेक्ष उपकारक्रम इति आदिवराहगतालापभूयिष्ठं व्यावहरन्नेव ॥ ललितकमलशोभे पर्वतेंद्रस्य पादे
गमयति कृतसक्तिर्वत्सराणां शतानि ॥ नरमृगपतिसूरेस्तादृशे वेंकटेशः कविरिव विगतान्यव्यापृतिश्रीनिवासः ॥
॥१॥ इति श्रीमच्छ्रीविलासे वेंकटेशकविः कृतौ प्रथमउल्लासः ॥ श्रीनृसिंहाय नमः ॥ अथ क्वचित्क्वचित्सुतमालो
कनजातानंदः ॥ क्वचित्स्थाने पृथुलकुचतटीरुण्याहितदृष्टिः ॥ क्वचिन्मातुलजातासूनुः ॥ क्वचित्सुतालसत्प्री
तिः ॥ क्वचिन्मानिततापसगणः भवन इव वनेपि विहरन् श्रीश्रीनिवासः कस्मिंश्चित्प्रदेशे अतिधवलशरीरकां
तिं ॥ अनिलवेगनिप्रकीर्णकपिशजटाकलापं ॥ किंजल्कपुंजोद्भासितमिव सितांभोजवनकांतिसमूहं ॥ कृ
त्त्राजिनानुगुंठितकलेवरं ॥ प्रलंबवधमुष्टितमुरांतकालिंगितमिव रेवतीजानिं ॥ कृतहरिचंदनांगरागं ॥ गंगा
जलस्नपितमिव शिरःशेखरचंद्रिकिशोरं ॥ सुतारोद्भासमानया [illegible] दृष्ट्या कांत्या च ॥ महत्या वीणया तप
स्यया च ॥ राजमानं किंच ॥ वसंतमिव सुरभिं ॥ ग्रीष्ममिव महातपस्थितिभास्करं ॥ वर्षावासरमिव नभस्यागम
नं कूलयंतं ॥ शरत्समयमिव अनुभूतनविधुप्रसादं ॥ हेमंतमिव सदा हिमहितं ॥ शिशिरमिव पुरस्कृतमाधवं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यनुभूतसर्वर्तुकालोचितचारुत्रपप्रज्ञातऋतुकौलोचितचरित्रं॥ पांडवमपिअर्जुनं॥ आत्मभूस्थूणीयमपिनिष्कामं॥
पर्वतयुक्तमपिअनाश्रितभूभृतं॥ क्षमावासमर्थंदुरचरं॥ अपापमपिनाट्टाभिधानं॥ कंचनतत्रभवंनिधिनयनातिथी
चकारं॥ अचिंतयच्च॥ नरागंमानसेधत्तेपक्षपातीचनोभवेत्॥ हंसोयंकस्यिदपरोघनसारुरचिर्यतिः॥१॥ततःकिंचिद्धि
हस्ययथाविधिप्राह॥ स्वयंभुवकळहोयंनिरंकुशसूत्रधारकृतोभवानिति॥ सोथवदत्॥ दक्षिणपाणिमुन्नमय्य॥ सूर्य
लोकेनिष्प्रभोयंचंद्रोकोमंदनंदनः॥ जिह्मंकरालीवहतेवन्हिःकेनोपमीयसे॥१॥ अस्तेतत्रभवद्दृशोनाकक्षयाविकुंठो
क्रमगमः॥ यत्रच॥ शोभमानमुक्तावलयः॥ राजमानातनुभाः॥ सरसंसरसः॥ असदृशाःभूभोगाः॥ वनिताजनश्च
यत्रचकुसुदंतरहारपालःसहिषःपर्यंकरूपः॥ शेषःकळितमहापरिवारगणःनजनाः॥ गत्वाचअहोदेवायोग्य
योरवसकळोकोतरंगयोः स्थूणीयजयविजययोःभासमानबलप्रचलयोःविदूरप्राप्ययोः॥ वैकुंठमभिधा
नयोस्तवलद्धोकस्यचेतिद्वयोःसंयोगःसंवृत्तेति॥ इमानेरस्तत्राश्चर्यं॥ भवानभूळोकंगतवानिति॥ ततश्चाह
मन्विष्यंश्चतस्तत्रआनंदकाननंगतोस्मि॥ यत्रचसदोपापिदुरापासाचंद्रोभागीरथीजनकक्षेत्रेण॥ त्रो[illegible]ठाया
स्यातमोरुध्यासाचित्रंचयतिरंगिणी॥२॥ अपिचकरेहिचक्रंगकळयंद्रियाळिंगितकंधरः॥ विनायकश्रियः शंभुमा

माधवश्चक्रिराजताम्॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्राप्यहं शुभा। मिलितोभयवाहिनीभरसंमर्दनर्तनसेकबंधप्रयागे कुरुक्षेत्रे च। हरिपदकिंतेगयाक्षेत्रे हिमवच्छिखरकं
देवेच॥ विफलिनप्रयासः॥ केवलहिंजातिस्कंधभोदक्षिणाशालस्त्रीकृत्यप्रवरापत्नीमितोमपिविप्रवरोपरोधितो॥ गोसाम्रा
प्य॥ नमोमेनदोगोहोनयनायनतांगता॥ नद्रामनतोगीनोनवपावनभोशुभा॥ २॥ इतिपद्मबंधेना स्तुचाच॥ ततःकेनचि
द्विसेनगमनकर्मीकृतपांडुरंगक्षेत्रस्तत्रभवदीयामूर्ति॥ नतवत्सलराजीवनेत्रमामवपास्व॥ नवृजीवनदारवदारुदानवजी
वना॥ १॥ इतिछत्रबंधेनस्तुत्वा॥ अथासन्नप्रसवधेनुमिवोभयतोमुखीकृत्यवेणीमुद्वेष्टयन्तिर्वर्तीलोकरणंपितॄणां
तेनैवक्रमेणप॥ आनेकसरभिमहिष्यादिभूषितानत्रग्रामानिवोहोस्य॥ उडुपवंशावलंकरराज्ञोहोचोरितोनृपोऽना
निवायगाद्य॥ मधुरापुरमिवअंधककुलादिरक्षणधर्मशालाकदेवमक्षिनद्यांकरचीपुरंगतचानास्मि॥ सांबत्वेम
दनेशंकरारिपोःक्षीराब्धिकन्यागृहमाश्रास्यंकमलस्यतामरसविख्यातिंगतस्यांजसा॥ भोवैकुंठसभार्यतांचभवतो
जानायायासंबुजहंद्वश्रीप्रतिमद्युचारुनयनाश्रीर्यत्रगोत्रस्तनी॥ २॥ तस्माच्चनिर्गत्यानेकपार्जितोद्वासि॥ तानिगिरि
कूटान्यतिक्रम्यउद्यानानिचपश्यन्॥ अनेककासारसंपरःधर्मेणाद्याःआमिनंद्यकिरातगृहाश्योसेवमानःअने
कत्रपापालीपरिगताःपानीयशालाःसंपूज्यदुर्जनतप्तीश्चमनसानिंदन्॥ अब्जाजरमणीभाःपद्मीपहसन्वनितास्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिहरन्रामसेतुमगमं॥ तत्र च॥ ऋक्षाधिराजो द्रवया कालिंद्या॥ यः नीलया सहा॥ क्रीडन्सिंधुर्मया दृष्टो
द्वारकायो भवानिव॥१॥ तरंगहस्तैर्मकरीः सुरापगा मुखेऽर्पयंतं प्रसमीक्ष्य वारिधिं॥ कावानदी सोत्कलिकोन
चासयद्बभूव नारीजनतापितीरगा॥२॥ अथ च सीता चक्षुर्भ्रशनंदमाब्धिं निरीक्ष्य सेतुं च॥ त्वद्विरहदनमपि द
मे सुखिनमिवासीत्तदा मुखलुचेतः॥३॥ तत्र तु कस्यचित्पांथस्य वचसा ज्ञातभवान्पन्नगाचले निवसतीति
ततश्च॥ जातानंदः इत एवागच्छन्मध्ये मार्गे कामपीत्यर्धोक्ते एव किंचिदारोचितभ्रूयुगलं॥ इषत्तरलितमस्त
कं॥ सामिदृष्टात्रसेरेनं॥ सपर्वतमुखावलोकनसंजातास्मितं॥ प्रमाद्रामभिनीय॥ देवविषयविरसोप्यस्मच्चि
त्तवृत्तिः॥ भवत्प्रेम्णा कुलाभवति॥ अस्त्वेतत्प्रकृतमनुसरामि॥ देवस्य चरणयुगलमपश्यं॥ पदार्थोयं प्रयासइ
ति॥ एवमाभाष्यालिंगितमानेतस्मिन्नुत्पादितकौतुकेनारदे देवोपि देवर्षे कामपीत्यर्धोक्तिस्य संवृत्तिरियं भृं
गीसंगीतभंगीविवशकुरंगी हृदयस्य लुब्धकबाणवेधः॥ किंच भवद्वितोदिर्थस्य ममानिवेदनं साधनिक
स्य पात्रादानप्रक्रिया क्वगता भैष्मीहरणकालीनानिर्व्याजकृपाभणमुनिकुलोत्तंस॥ अनारंभो मनुष्याणां

दमुद्रि

प्रथमं बुद्धिलक्षणं॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरब्धस्यांतगामित्वं द्वितीयं बुद्धिलक्षणं ॥ इति न श्रुतं भवता ॥ कुरु कोमलं मनः मा भवतु शिरीषं कुसुममपि कठिणमिति विविधानुनयकोविदः कथं कथमपि ॥ तद्वृत्तांतशेषकथनोन्मुखं चक्रे सोपि सफलप्रायो मे मनोरथरसालद्रुम इति निश्चित्याह ॥ देव शृणु सावधानमनाः वारुण्याश्चेतोविलास इवानंतमार्गविलंबिनि मद्देहच्छविकौमुदीवभ्रमागतभ्रमद्बालचकोरनिकरपक्षसमीरतरलितवीणागुणक्वणनसमाकर्णनैकाग्रमनसि मय्यागच्छति ॥ किंचिन्निकट एव संजातेस्मिन् पर्वते पर्वतः सर्वतः संचारितचक्षुरिक्षुरसासारमधुरां विधुराधिपवाचमवोचत् ॥ आर्येतः पश्यतु भवान् ॥ यदत्र लसच्चक्रः ॥ राजज्जलजः ॥ व्यालोलवनमालः ॥ दिव्यासारसनालीलसत्कमलोद्भासितः गरुत्मत्पक्षिसेवितः ॥ सदाशेषभागिप्रियः ॥ इंदीवरश्यामलकांतिः ॥ अयमयमग्रत एवोत्सर्धोक्त एव जृंभारंभेणाकुलीकृतोयं तदन्वहमपि चेदेवं भगवांछ्रीनिवास एष भवेदित्यालोच्योद्घाटनयने क्वक्वसाध्वातारचंद्रं जयजीवेत्याशिषाभिनंद्य गृहाण पारितोषिकं प्रियमावेदयसीति कटिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ळितं॥ गोदावरीस्नानसमयतत्तीरविस्मृतपटीभवत्कृष्णसाराजिनबंधनपट्टसूत्रं तद्भ्रांत्या केवलमाकाश एव समर्प्य विस्मृतदेहभावस्त्वमिव राधाकुचकलशदर्शनेनावस्थितः ततस्तेनापि कथमयमकस्माद्भूताविष्ट इव चेष्टत इति शंकितमनसा किंचिदपसृत्य विस्मयोज्जृंभमाणं तारं वीक्ष्यमाणः यावत्पुरतः पश्यामि तावत्कमपि कासारमपश्यं॥ न भवंतं॥ स च नाम्ना पद्मसर इति॥ देवेनाप्यौषधगवेषणकृतबहुपर्यटणदृष्टं विस्यात्॥ पस्तु अमृतांधस इवामानवाः अस्त्वेतदथ श्लेषवादलुब्धसनेनानेन वंचितोहं॥ इति निश्चित्य तस्य तस्य सरश्चक्रवर्तिनश्चक्रवर्तिन इव जृंभमाणसहस्रपत्रस्य॥ कंठशोभमानकनकमालस्य॥ पुटभेदशोभावहस्य तटनिकटेक्षणमतिष्ठं॥ ततः परं यद्वृत्तं तदस्मच्छात्रस्य कलापस्य कलत्रं कलकंठीनामकिंचरीवक्तीत्युक्त्वा विरसमा॥ अथ तदाज्ञया हसाय थार्थाभिधानाकलकंठी॥ अत्रांतरे देवकुतोपि॥ पार्वतीशरीरमिव चंद्राभरणभूषितं॥ मेरुशृंगमिव नक्षत्रमालापरिगतकंठं॥ विंध्याटवीस्थानमिव मृगराजोल्लसन्मध्यदेशं॥ शेषाचलस्वरूपमिव स्फुरद्राजीवपादं॥ नाटकमिव मनोज्ञांकं॥ मनुकुलमिव जलसद्भीरनाभिं॥ रहूगणचित्तमिव कलितभरतागमप्रक्रियं॥ ऋषिकदंबमिव स

त्संगीतज्ञानं॥ नक्षत्रवृंदमिव चंद्रमुखं॥ माधवद्विजमानसमिव कुंतलोल्लासितं॥ यावत्समाविरासीत्



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रनाहानिताकंबेषुचंद्रमूर्तिमिवुसन्मान्यंसकहस्तश्रवणोचित्रोत्तरानंददायिनीसच्छ्रवणोगोरोरुकांच॥त
अना थापिकलितगुरुकलत्रस्यशंभिनुभूताश्लेषामेस्पृष्टकलेकांदोषानुबंधरहितांमज्ञानतमःसंबंधजातविकारांच
कामपिकन्यामणिमज्ञाक्षं॥यस्यानारदस्यद्वराःकेरापाशोहासश्च॥देवनागसिद्धनोज्ञावेणीगंधर्वछुचिश्च॥अर्ध
ग चंद्रदग्धललाटमंडलंकटाक्षकंदर्पबंधा॥सोरधिकारिनयनयुगंगमनंच॥रागोत्तराधरःक्वापियूनिचेतःश्रमारोपि॥
चापोपकारिणीभ्रूलतामुत्तिश्च॥चंद्रभासकरमुखशोभादेहच्छविश्च॥कुंडलीकपोलरोमावळीच॥रंतिसंदररूपवयश्च॥च॰
नाभिःकुचद्वयीच॥शंखकांतःकंठंकापाणिश्च॥गुरुमनोहरनितंबबिंबंचरितंच॥हंसकोद्भासितापदृश्यसीमंतकलित
सिंदूरेचरेखा॥अनंतरदयंगममवळग्नेगुणरंदंच॥चित्रोरुकदलादितःउरुभागःसर्वावयवसंचयश्च॥देवपश्चाद्रता
तंसाकस्यचिद्वरःकन्येति॥अथसाराजहरिकानाभिःसमानशीलवयोविद्यासाभिःसखीभिःसहजलेयावद्विह
रतिनावदेवतेनैवमार्गणस्त्रीवसेनानाभिवल्लीमुखभूषितानां॥मेरुदेवीनाभिचनाभिरम्यकुचानां॥द्वत्रगद्वा
द्यातयष्टिगर्भेरिवन्यस्तकरानां॥चक्षुश्रुतीनाभिवविरसानां॥पुष्करावर्तवन्नीरदानां॥आर्याणामप्यनुग्रहभावाभ्यं
यानां॥क्षीणप्रकाशानामपिवृद्धदासीनां॥विनतानामपिवयःसंनोषरहितानां॥अदैन्यशोभानामपितांतनांजरतीनांच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(कुंभमाजगामा।तत्रस्तां भयेनस्त्री छेनिर्गत्यसरसः क्षीरपाराद्वारदिवमास्तहसस्त्री कदंबाविविधालतावल्लीमध्यवर्ति
नीवकल्पलता॥ कस्त्वंश्वरिदृनीलसोपानश्रीलालले॥ नीलनीरदमंडलइवसौदा[redacted]क्षणमतिष्ठत॥अथनासःतत्स
रवीषुकाचिदभिनवमधुपानमत्तोप्राह॥अयेकांचननिभमतेहारिके॥लल्लदुवंगिकागंधविलसत्समीरणः॥तंतंतनो रस
तिसंतोबंभोभोगीदृसंततेः॥१॥इतितच्छ्रुत्वातूष्णीस्थितायांराजपुत्र्यांअन्योपिकांचना॥आत्यग्रदंतसंतुष्यमानाधर
विबाप्राह॥अयिराजनंदिनि॥निर्यत्किंजल्कगंधांधसारंगणसंगिणी॥कलंकस्वयाकीर्णाकोनेयंसरसीसखि॥१॥
हंससारसचक्रांगचक्रैरलंकृतः॥नयनानंदनिलयःकस्यनस्याज्जलाशयः॥१॥इतिनृपिकिमपिध्यायंतीवत
स्यास्तल्लाघ्यपश्लोकमिवेनस्याःनिरोष्टश्लोकंहृयमन्यनाकर्ण्यस्थितासाअथसासरवीविहस्यपुनःप्राह॥अयि
धरानायकशरीरजेज्ञातंतेहृदयंतंचिंतयसि॥पश्यनीलनीरदसच्छायःशंखचक्रगदाधरः॥रत्नाकरांगजानाथःके
सनागेंद्रकेसरी॥१॥राधासेनन्यस्तकरःसरागिजनाग्रगण्यः किंचनदंजातः॥सकंसहंसीनकदंबजातहरिहरिः
कांचनरोचधीतः॥२॥तच्छ्रुतंतेदृशायाःअंगीकृतंचानेनजनेनतन्नियतिरचिरादृटयतिनेचिंतयजकुरंगकुल १५
यसत्यतांगीर्यस्यजनस्ययतः॥सिंहिजलजसदृशदेहकांतिधरिणिधरेंद्रशरीरजातजानिः॥कलयतिसहिरत्ननीरजंते



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरसदृशः किल राजशेखरश्च ॥१॥ यश्च धृतचक्रशंखतया धीरतया च अरिदरकरः ॥ राजहंसतया अहंसकला धीरतया लं
कृत इत्यहंकृतिरहितः ॥ किंच कलहंसश्च कलहंसो नंदनांगी चकारा चक्री च नगरस्थितिकलितश्च ॥ गाधिराजजा
ताश्चर्यचर्यश्च नगाधिराजजाताश्चर्यचर्यश्च ॥ यं चाह्लादितनीलं ॥ ज्ञातशीतेतरदीधितिनयाधिकरश्रियं ॥ जय
सक्तचेतसं ॥ दाशरथिं कृष्णं च जानंति ॥ येन नयेन रंजितः किल जनः ॥ यस्य च स्त्रीणां चंद्राचलकांतिहारी स्तनः आस्यं
च ॥ सरलता हृद्या गीः कंठस्थली च ॥ किसलयसहजः अधरः धरसदृशस्तनः ॥ यस्य चाधिकलक्षणाः गायनाः जना
श्च ॥ अधिककेलिहृद्याः क्रीडाशैलाः गिरश्च ॥ अधिकं जातरागः अधरः लीलाहंसश्च ॥ अधिकाननानंददाः हरिणाः
स्त्रियश्च ॥ अधिकरंजकाः सालाः गिरश्च ॥ अधिकं धरासक्ताः हाराः कर्षकार्षकाश्च ॥ अधिकं दराराजिताः अ
रयः शांतिधनस्थल्यश्च ॥ अधिकारिजनश्रियः लसंति नलसंति च ॥ अधिकरणरसिकाः रथिकाः ग्रंथिकाः स्त्रियश्च ॥
अधिकासारश्रियं दधाना नगरी ॥ देशश्च घनश्च ॥ यस्य चारिचक्रं खंडकं चारिचक्रं ॥ अगदो गदा ॥ सन्नंदकः सन्नंदकश्च
राजति ॥ किंच यस्य चाराधिकानंदः राजनीत्यां रते च ॥ चरणजातागंगा कीर्तिश्च ॥ चेलाकृष्टिः रतिकाले स्त्रीणां रणे अ
रातीनां चेतः कलितानंदः दयाकटाक्षश्च ॥ यत्र शासति धरणीं ॥ कृष्णकेशश्रियं धत्ते कचरचना राजहंसा नलसत्स्थिति
आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हासश्च स्त्रीणां॥ अरिस्त्रियः अकेशाः हरिजलजासनश्री कंठदृशोदर्शयंति॥ अलि॥ लसत्संगरहिततालेलयंत्राणां
स्त्रीणां नारिसेनानां च॥ स्तननखहर्षकः घनकालः नस्त्रीजनः॥ चलतादृशिनेत्रे क्रीडाशैलेक्षणचेतसि॥ किंचस्त्री
णांकीर्तिः कनकस्तनः करकः कंठः जलजः नेत्रंनलिनभास्यं सरसंस्निहस्त्रीनेत्रंदनदनः रागोनदीनां॥ किंचारसाः
आरातयः॥ धृतरागासनाः आस्यजाः॥ अरिष्टकारणंरधिः॥ कर्णशिरश्छेदाकर्णेनचिंतकथां॥ हसानदाहेसेतासे
हिकेये॥ राक्षसानंदः शरजूणे॥ अर्थासक्तिः शास्त्रचिंतकानां॥ नार्थासक्तिः गीतानंदश्च॥ यतीनां॥ नगीतानंदः सहस्रधा
रणाकांक्षायतीनां क्षत्रियाणां च॥ किंचलसच्छीजाजानिस्त्रीजालानिक्षत्रियाधिकजातिजालंच॥ सराज्ञानिराज्ञाणि
अग्रजातिजानंच॥ अच्छंकिलास्यंतंकथयोनोसेना॥ सदायानिसंगतानिधनरहाणिचहृदयाणिचरधिकंचेति॥
अत्रोनरेयासांचलंतोदंताःनेत्राः॥ धवलाःकेशाःनहंसाःदृहृदयः नकुचमंडलंबलीवदनेनोहोभुग्नतामध्यदेशेन
कृतलेघुतासंतुजरहनितानोक्षिन्नभेरीसमानःकोपिध्वानः व्याकुलीचकारसससरवीरंवाराजकन्यां॥ तथा
हि॥ अयंबांबमणिमक्षिभक्षिरणं॥ पश्यपश्यचंडकोपाःयामपुंडरीकांगहाणरक्ष्कोरक्षकगणं
पटिकांचराजभार्यायाः हर्षकारणंपंकजचयंरंडयाछाछेभोक्षिराधूर्यकुंभंभरद्रिरीभागेभणममगिराराजकु



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मारी॥ आका[illegible]कारण्या। रचयप्रणामपरिपाटीरमायाइतिउ[illegible]चचिरयंत्या राजकन्यायां पुनः किंचित्कोपेन निर्दंत्याक्षरा
णि विस्मृत्य[illegible]मयाग्रे गंतव्यमिति रभसादभिधाय अहहेति दंत्याक्षरसंसर्गदूतदंतावलयः खेदमुद्रामभिनीय जोषंत
स्थः॥ ततश्चे[illegible]राजपुत्री शनैरुत्थाय। घनसारसदृशेन केशकलापेन॥ नभोगयोग्येन रूपेण। अतिमुग्धया दशया॥
अनंगरागो[illegible]लेन वपुषा॥ नाभिस्पृष्टेन कुचमंडलेन॥ अतनुसुंदरेण भूषाजालेन॥ धवलसल्लोभनयानसेन॥
शोभमाना[illegible]रतीभियुवतीभिश्च परिवृता॥ सा वै श्रवणनीलेन पद्येन च योजयंती॥ अपांगमाशुगं चेतस्तनः प्रेर
यंती॥ मुदापीनपयोधरमंडलं चंद्रेण संघटयती॥ चंद्रभूषणमपि करे व्यवस्थापयंती॥ वशीकृतसकलनिर्जरकदंबो
यथागतं गतवती। तीत्युक्त्वा तस्याः किन्नर्यासंवृतवचनार्या प्राह स्म नारदः॥ अथ सवितरि तीव्रपर्वतेन प्रबोध्यमान
कालापगमः देवस्य दर्शनसुखमनुभवितुमत्रागतोस्मि। दिवा केचिंतयसि॥ श्रवणादेव सा किं तरलयति तव चेत
नां॥ मा भव तरलस्तरलः हारमणिमध्ये रेवनायको भवति॥ न पुमान्तिष्ठ मनुष्यवत्॥ अस्त्वेतत्॥ कथितं कथनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 14:38
,TRANSFERRED=2020/10/19 at 14:41:45
,PAGES=33
,TYPE=STD
,NAME=S0004171
,Book Name=M-1795-SHRI VILASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection